# शाकटिक :

वर्षासु शाकटिकः कश्चित् भाण्डान्यारोप्य स्वीयं शकटं नगरान्तरमनयत्। रथ्यायां पङ्के मग्नं शकटस्य चक्रं रुद्धमभूत्। वृषभौ बलवत् प्रहरन्नपि स शकटं चलयितुं नाक्षमत।

ततः स भगवन्तं नारायणं प्रति चुक्रोश। तस्याक्रोशं श्रुत्वा दयालुर्भगवांस्तस्य पुरस्तादाविरभूत्। अभाषत च शाकटिकम् –'भो मूढ! किमिति जोषमास्से? मम साहाय्यं वाञ्छसि चेत् - उत्तिष्ठ, धुर्यौ चोदय, चक्रं स्कन्धेन प्रचालय। एवं कृतेऽहं ते साहाय्यं करिष्यामि' – इति। एवमुक्त्वा भगवानन्तरधात्।

ततः शाकटिकेन तथा कृते भगवतः साहाय्येन शकटं पङ्कान्निरगच्छत्।

यात्रा च शाकटिकस्य निर्विघ्नाऽभूत्।